"तपसश्च मनुं पुत्त्रं भानुश्चाप्यङ्गिराः सृजत् ।"
यादवविशेषः । यथा, हरिवंशे । १४७ । २ ।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप ! ।
जहारात्मवधाकाङ्क्षी निकुम्भो नाम दानवः ॥")
किरणः । ( यथा, ऋग्वेदे । ६ । ६४ । २ ।
"भद्रा ददृक्ष उर्व्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन् ॥"
"भानवो रश्मयः ।" इति तद्भाष्ये सायनः ॥)
अर्कवृक्षः । इत्यमरः । २ । ४ । ३३ ॥ प्रभुः । राजा । इति धरणिः ॥ वृत्तार्हत्पितृविशेषः । इति हेमचन्द्रः । २ । १४ ॥
भानुः, स्त्री, ( भातीति । भा + नुः ) भानुमती । इति शब्दरत्नावली ॥ ( दक्षकन्याभेदः । यथा, मत्स्यपुराणे । ५ । १५ ।
"शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः ।
मरुत्वती वसुर्यामी लम्बा भानुररुन्धती ॥")
भानुफला, स्त्री, (भानुरिव दीप्तिमत् फलमस्याः ।) कदली । इति जटाधरः ॥
भानुमती, स्त्री, ( भानु + मतुप् + ङीप् । ) विक्रमादित्यराजपत्नी । यथा,—
"देवगुरोः प्रसादेन जिह्वाग्रे मे सरस्वती ।
तेनाहं नृप ! जानामि भानुमत्यास्तिलं यथा ॥"
इति वररुचिः ॥
( कृतवीर्य्यस्य दुहिता । सा च अहंयातेः पत्नी ।
"यथा, महाभारते । १ । ९५ । १५ ।
"अहंयातिः खलु कृतवीर्य्यदुहितरमुपयेमे भानुमतीं नाम । तस्यामस्य जज्ञे सार्व्वभौमः ॥"
अङ्गिरस: प्रथमा सुता । यथा, महाभारते । ३ । २१७ । ३ ।
"प्रजासु तासु सर्व्वासु रूपेणाप्रतिमाभवत् ।
देवी भानुमती नाम प्रथमाङ्गिरसः सुता ॥"
यादवभानोः कन्या । यथा, हरिवंशे । १४७ । २ ।
"कन्यां भानुमतीं नाम भानोर्दुहितरं नृप ! ॥"
दुर्य्योधनपत्नी । यथा, वेणीसंहारनाटके २ अङ्के ।
"आर्य्य ! एषा भानुमती देवी पत्युः समरविजयाशंसया निर्वर्त्तितगुरुपादवन्दनाद्यप्रभृति आरब्धनियमा बालोद्याने तिष्ठतीति ॥"
गङ्गा । यथा, काशीखण्डे । २९ । १२९ ।
"भुक्तिमुक्तिप्रदा भैक्षी भक्तस्वर्गापवर्गदा ।
भागीरथी भानुमती भाग्यं भोगवती भृतिः ॥")
भानुमान्, [त्] पुं, ( भानवः सन्त्यस्येति । भानु + मतुप् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (यथा, कुमारसम्भवे । ३ । ६५ ।

> "अथोपनिन्ये गिरिशाय गौरी
> तपस्विने ताम्ररुचा करेण ।
> विशोषितां भानुमतो मयूखै-
> र्मन्दाकिनी पुष्करबीजमालाम् ॥"

कलिङ्गदेशजनृपतिविशेषः । यथा, महाभारते । ६ । ५१ । ३३ ।
"भानुमांस्तु ततो भीमं शरवर्षेण छादयन् ।
ननाद बलवन्नादं नादयानो नभस्तलम् ॥"
केशिध्वजस्य पुत्त्रः । यथा, भागवते । ९ । १३ । २१ ।
"भानुमांस्तस्य पुत्त्रोऽभूच्छतद्युम्नस्तु तत्सुतः ॥")
दीप्तियुक्ते, त्रि ॥ (यथा, महाभारते । १ । ३० । ४७ ।
"चर्म्माण्यपि च गात्रेषु भानुमन्ति दृढानि च ॥")
भानुवारः, पुं, (भानोर्व्वारः ।) रविवारः । यथा,—
"अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥
अत्र स्नानं जपो होमो देवतानाञ्च पूजनम् ।
उपवासस्तथा दानमेकैकं पावनं स्मृतम् ॥"
इति तिथितत्त्वे सम्वर्त्तवचनम् ॥
भानेमिः, पुं, ( भानां प्रभाचक्राणां नेमिरिव । ) सूर्य्यः । इति त्रिकाण्डशेषः ॥
भाम, ङ क्रोधे । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् ।) ङ, भामते । इति दुर्गादासः ॥
भाम, त् क कोपने । इति कविकल्पद्रुमः ॥ अदन्त-चुरा०-पर०-अक०-सेट् । ) अवभामत् । इति दुर्गादासः ॥
भामः, पुं, (भामनमिति । भाम क्रोधे + घञ् ।) क्रोधः । ( यथा, ऋग्वेदे । ५ । २ । १० ।

> "मदेचिदस्य प्ररुजन्ति भामा
> न वरन्ते परिबाधो अदेवीः ॥"

"भामाः क्रोधा दीप्तयो वा ।" इति तद्भाष्ये सायनः ॥ भातीति । भा + "अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदीति ।" उणा० १ । १३९ । इति मन् ।) सूर्य्यः । (भा + भावे मन् ।) दीप्तिः । इति मेदिनी । मे, २१ ॥ भगिनीपतिः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । ६ । १६ । ४९ ।
"गुरुं मित्रं तथा भामं पुत्त्रञ्च भगिनीं तथा ॥")
भामकः, पुं, ( भाम एव । स्वार्थे कन् ।) भगिनीपतिः । इति शब्दरत्नावली ॥
भामा, स्त्री, (भामते इति । भाम् + अच् + टाप् ।) कोपना स्त्री । इति शब्दरत्नावली ॥
भामिनी, स्त्री, ( भामते इति । भाम् + णिनिः + ङीप् । ) कोपना स्त्री । इत्यमरः । २ । ६ । ४ ॥ स्त्रीमात्रम् । इति राजनिर्घण्टः ॥ ( यथा, भागवते । ९ । १८ । ६ ।
"एकदा दानवेन्द्रस्य शर्म्मिष्ठा नाम कन्यका ।
सखी सहस्रसंयुक्ता गुरुपुत्त्री च भामिनी ॥"
सुनयनामकगन्धर्व्वस्य दुहिता । यथा, मार्कण्डेयपुराणे । १२८ । ७ ।
"राजपुत्त्र ! सुतेयं मे भामिनी नाम मानिनी ।
अभिशापादगस्त्यस्य विशालतनयाभवत् ॥")
भामिनीविलासः, पुं, ( भामिन्या विलासो यत्र । ) जगन्नाथमिश्रपण्डितराजकृतकाव्यग्रन्थविशेषः । तस्याद्यश्लोकोऽयम् ।
"दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥
तस्य पुष्पिका । इति श्रीमत्पण्डितराजजगन्नाथविरचिते भामिनीविलासे प्रास्ताविकः प्रथमो विलासः । शृङ्गारवर्णनं द्वितीयो विलासः । श्रीकृष्णगुणानुवर्णनं तृतीयो विलासश्च ॥
भामी, [न्] त्रि, (भामः क्रोधोऽस्त्यस्येति । भाम + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनि ।) क्रोधी । ( तेजस्वी । यथा, ऋग्वेदे । १ । १७ । १ ।
"कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ॥"
"भामिने तेजस्विने ।" इति तद्भाष्ये सायनः ॥)
भारः, पुं, (भ्रियते इति । भृञ् भरणे + "अकर्त्तरि च कारके संज्ञायाम् ।" ३ । ३ । १९ । इति घञ् । ) विंशतितुलापरिमाणम् । इत्यमरः ॥ तत्तु अष्टसहस्रतोलकात्मकमिति यावत् । वीवधः । यथा,—
"अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्द्दभात् ॥"
इति चाणक्यम् ॥ * ॥
विष्णुः । इति मेदिनी । रे, ७२ ॥ गुरुत्वञ्च ॥ ( गुरुत्वगुणवद्वस्तु ॥ )
भारण्डः, पुं, उत्तरकुरुदेशजशकुनपक्षी । इति पुराणम् ॥
भारतं, क्ली, (भरतान् भरतवंशीयानधिकृत्य कृतो ग्रन्थ इत्यण् । यद्वा, भारं चतुर्वेदादिशास्त्रेभ्योऽपि सारांशं तनोतीति । तन् + डः । ) ग्रन्थभेदः । इति मेदिनी । ते, १३८ ॥ तत्तु व्यासप्रणीतलक्षश्लोकात्मकमहाभारतसंज्ञकेतिहासः । तस्य श्रवणादिफलं यथा,—
"भारतं शृणुयान्नित्यं भारतं परिकीर्त्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥

> यो गोशतं कनकशृङ्गमयं ददाति
> विप्राय वेदविदुषे सुबहुश्रुताय ।
> पुण्याञ्च भारतकथां शृणुयाच्च नित्यं
> तुल्यं फलं भवति तस्य च तस्य चैव ॥

नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा ।
ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठश्चतुष्पदाम् ।
यथैतानीतिहासानां तथा भारतमुच्यते ॥
यश्चेनं श्रावयेत् श्राद्धे ब्राह्मणान् पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ॥
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते ।
भ्रूणहत्याकृतञ्चापि पापं जह्यादसंशयः ॥"
इति महाभारतम् ॥ * ॥
तद्वृत्तान्तो यथा,—
ब्रह्मोवाच ।
"भारतं संप्रवक्ष्यामि भारावतरणं भुवः ।
चक्रे कृष्णो युध्यमानः पाण्डवादिनिमित्ततः ॥
विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्त्रोऽत्रिरत्रितः ।
सोमस्ततो बुधस्तस्मादुर्व्वश्यान्तु पुरोरवाः ॥
तस्मादायुस्तस्य पुत्त्रोऽभूद्ययातिर्भरतः कुरुः ।
शान्तनुस्तस्य वंशेऽभूद्गङ्गायां शान्तनोः सुतः ॥